वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

# श्रीशङ्करदेशिकाष्टकवृत्तिः

अङ्कुरनागपालः[१]

**जयताद्भुवि सर्वत्र शङ्करार्यो जगद्गुरुः।**
**यः शम्भोर्विभवः शिष्यभवाभावोद्भवोऽभवत् ॥**

अथ स्वगुरोः शिवगुरुसूनोः परशङ्करावतारस्य श्रीशङ्कराचार्यस्य माहात्म्यप्रकाशनाय तमधिकृत्य 'श्रीशङ्करदेशिकाष्टकम्' इतिनामाऽयं स्तवः श्रीतोटकाचार्येण कृतः। अत्र देशिको नाम गुरुः; *'गुरौ देश्ये च देशिकः'*[२] इतिकोशोक्तेः। देशिनी नाम तर्जनीसञ्ज्ञा काचिदङ्गुलिस्तया परमात्मतत्त्वं लक्षयति यः, स गुरुरेव देशिकः। अत्र पद्यानामष्टकेन भावात्मकः साष्टाङ्गप्रणामो द्योतितः। द्वादशाक्षरेण तोटकच्छन्दसा श्रीभगवत्पादस्य द्वादशादित्योपमत्वं सूचितम्। वक्ष्यति च - *'अहिमांशुरिवात्र विभासि गुरो'*[३] इति।

सुप्रसिद्धमिदमैतिह्यं यत् श्रीमद्भगवत्पादस्य सन्निधौ गिरिनामा कश्चन अन्तेवासी शिष्यो बभूव, यो ह्यनन्यभावेन सदैव स्वगुरुपरिचर्यायां संलग्नः। एकदा स श्रीभगवत्पादस्य वेदान्तव्याख्यानावसरे तत्कौपीनप्रक्षालनाय दूरस्थां नदीं गतः। अतोऽसङ्ख्येषु स्वशिष्येषु वेदान्तजिज्ञासुषु सत्स्वपि वात्सल्यमूर्तिः श्रीशङ्कराचार्यः 'स्थीयताम्! गिरिरपि क्षणमात्रादेष्यति' इत्युक्त्वा तस्य प्रतीक्षाञ्चकार। तदाऽन्ये शिष्या ऊचुः-'भोः गुरवः! गिरिस्तु मन्दमतिः। अस्माभिः कस्मिंश्चिदपि भवद्व्याख्यानावसरे तन्मुखादेकाऽपि जिज्ञासा न श्रुता, तन्मुखमण्डले 'अयं सिद्धान्तः स्पष्टोऽभवत्' इत्याकारकः सन्तोषोऽपि न दृष्टश्च। तर्हि किमर्थं तस्य प्रतीक्षा कार्या?' इति। अतः स्वशिष्याणां वचांसि श्रुत्वाऽऽचार्यो

---

१. विशिष्टाद्वैतविभागीयः शोधच्छात्रः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः; R/o ४/९-१०, Vijay Nagar Double Storey, Delhi - ११०००९

२. अमरकोशे ३.३.१६२

३. तोटकाष्टके ६

भगवत्पादस्तदा कृपया परयाऽविष्टः स्वमनःसङ्कल्पेनैव गिरये सर्वां ब्रह्मविद्यां ददौ; यां लब्ध्वाऽज्ञाननिवृत्तिद्वारा स्वस्वरूपानन्दमनुभवन् स स्वगुरुदर्शनोत्सुकः सन्नदीकूलादचिरात् स्वाचार्यसन्निधावेनं वक्ष्यमाणं स्तवं पठन् समागतः। सगणचतुष्टयात्मके तोटकाख्ये कस्मिंश्चिद्वृत्तेऽयं स्तवो रचितः, अतस्तोटकाष्टकनाम्ना लब्धप्रतिष्ठः। स्वशिष्यमुखादेनं स्तवं श्रुत्वाऽपरशङ्करः श्रीशङ्कराचार्य आशुतोषस्तुतोष, अथान्यानां स्वशिष्याणां गर्वनिबर्हणाय गिरिं सर्ववेदान्तरसरहस्यप्रतिपादनार्थम् आज्ञापयामास। ततो गुरुकृपाधुरीणो गिरिस्तत्क्षणं तत्र स्थित्वैव तोटकवृत्तोपनिबद्धं *'श्रुतिसारसमुद्धरणम्'* इत्याख्यमेकं ग्रन्थरत्नञ्चकार। तोटकवृत्तोपनिबद्धयाऽशेषया स्वरचनया स गिरिस्तोटकाचार्यनाम्ना प्रसिद्धो जातः। अथातो *'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ'*[४] इति श्रुतिं प्रमाणीकुर्वन् श्रीतोटकाचार्यः स्तोत्रयामास -

**विदिताखिलशास्त्रसुधाजलधे महितोपनिषत्कथितार्थनिधे ।**
**हृदये कलये विमलं चरणं भव शङ्कर देशिक मे शरणम् ॥१॥**

*'भव शङ्कर देशिक मे शरणम्'* इत्यस्य सर्वत्राभ्यासः। अस्यार्थः - हे ***शङ्कर!*** शङ्करेतिसञ्ज्ञः शं-कल्याणं करोति यः, स च। ***देशिक!!*** गुरो। ***मे*** मम ***शरणम्*** आश्रयस्थानं-रक्षिता ***भव*** भवतादिति। भवान् विदिताखिलशास्त्रसुधाजलधिः महितोपनिषत्कथितार्थनिधिश्च। जलधिस्तु समुद्रः। शास्त्रं तु सुधामयजलधिना सादृश्यं भजते; भ्रमादिसर्वदोषरहितत्वाद् विस्तृतपरिमाणत्वाच्च। अतः सम्प्रदायेन स्वतपसा च विदितः समुत्तारितोऽखिलोऽशेषः शास्त्रसुधाजलधिर्येन, स विदिताखिलशास्त्रसुधाजलधिः; तत्सम्बुद्धौ ***विदिताखिलशास्त्रसुधाजलधे*** (तृतीया-बहुव्रीहिः)। उपनिषदि ब्रह्मकाण्डे वेदस्योत्तरभागे कथितानामर्थाणां रहस्यविषयाणां निधिर्यः, स एव उपनिषत्कथितार्थनिधिः (षष्ठी-तत्पुरुषः)। अथ वा; उपनिषदि कथितोऽर्थो विषयः-आत्मैव निधिः (कर्मधारयः); *'यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुः। एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः'*[५] इतिश्रुतेः। महितः पूजितो याथात्म्ये-वास्तविकेऽर्थे समन्वितः प्रामाण्यत्वेन लोके शिष्यहिताय स्वाचरणे च प्रतिष्ठितः स उपनिषत्कथितार्थनिधिर्येन, स महितोपनिषत्कथितार्थनिधिः

४. श्वेताश्वतरोपनिषदि ६.२२

५. छान्दोग्योपनिषदि ८.३.२

(तृतीया-बहुव्रीहिः)। अथ वा; महिता पूजिता उपनिषद् एव (कर्मधारयः); मोक्षप्रदातृसामर्थ्यात् स्वप्रतिपाद्यविषयस्य सर्वोत्कृष्टत्वाच्च। यस्तासु कथितानामर्थाणां निधिः, स महितोपनिषत्कथितार्थनिधिः; तत्सम्बुद्धौ ***महितोपनिषत्कथितार्थनिधे*** (षष्ठी-तत्पुरुषः)। अत्र निधिर्नाम समुद्र आधारो वा। एवंविध शङ्कर देशिक मे मम शरणं भव। अहं भवदीयं ***विमलं*** पवित्रतमं निवृत्तमायामलं ***चरणं*** पादं मम ***हृदये*** मनसि ***कलये*** स्थापयामीत्यर्थः। अत्र मुमुक्षुणां कृते ब्रह्मविद्याभ्यासाय सम्प्रदायानुगतस्य कस्यचिद् श्रोत्रियब्रह्मनिष्ठस्याचार्यस्य प्रपत्तिरावश्यकी इति द्योतितः, *'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्। नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'*[६] इतिश्रुतिश्च प्रमाणम्। *'श्रोत्रियम्-अध्ययनश्रुतार्थसम्पन्नम्। ब्रह्मनिष्ठम् - हित्वा सर्वकर्माणि केवलेऽद्वये ब्रह्मणि निष्ठा यस्य सोऽयं ब्रह्मनिष्ठः'* इति तत्रत्यं भगवत्पादीयभाष्यम्। ततस्तु 'विदिताखिलशास्त्रसुधाजलधे' इतिपदेन श्रीशङ्कराचार्यस्य श्रोत्रियत्वं 'महितोपनिषत्कथितार्थनिधे' इत्यनेन ब्रह्मनिष्ठत्वं च विज्ञेये।

अत्रेदं श्रद्धेयं यद् निवृत्ताज्ञानेन तोटकाचार्येण *'भव शङ्करदेशिक मे शरणम्'* इति किमर्थमुक्तम्? यतो हि निवृत्ते सत्यज्ञाने कुतो भयम्; *'अभयं वै जनक प्राप्तोऽसि'*[७] इत्यादिश्रुतेः? इत्यत्र ब्रूमः - लोकसङ्ग्रहार्थमेव; *'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः'*[८] इतिस्मार्तन्यायात्। यथाऽहं गुरुकृपया निवृत्ताज्ञानोऽद्वैतात्मानन्दस्वरूपोऽभवं, तथैवास्मत्साम्प्रदायिका अपि भवन्त्विवितिधियैवमोक्तं किल। अथ दैन्यं प्रदर्शयन् स्वसामर्थ्यराहित्यं स्वमनोरथञ्च प्रकटयति स्तोता -

**करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम् ।**
**रचयाखिलदर्शनतत्त्वविदं भव शङ्कर देशिक मे शरणम् ॥२॥**

हे करुणावरुणालय! मां भवसागरदुःखविदूनहृदं पालय। मामखिलदर्शनतत्त्वविदं रचयेति योजना। वरुणालयो नाम समुद्रः। करुणायाः स्वप्रपन्ने श्रद्धावत्यनुग्रहभावस्य वरुणालयः करुणावरुणालयः; तत्सम्बुद्धौ ***करुणावरुणालय*** (षष्ठी-तत्पुरुषः)। खानि नामेन्द्रियाणि ज्ञानकर्मसाधनानि; दुः क्लेशकरं

६. मुण्डकोपनिषदि १.२.१२

७. बृहदारण्यकोपनिषदि ४.२.४

८. श्रीमद्भगवद्गीतायाम् ३.२१

खेभ्यो यत्तद्दुःखम् (चतुर्थी-बहुव्रीहिः)। तच्च त्रिविधम् - दैहिकं (स्वदेहसम्बन्धि; वातपित्तकफविकारजनितं रोगरूपं प्रियवियोगादिजनितमवसादरूपं वा), भौतिकं (स्वेतरप्राणिनिमित्तकं हिंसालक्षणम्), दैविकं (उक्तयोर्विलक्षणं सर्वम्) चेति। त्रयाणामेषां निमित्तं भवः संसारो जन्ममृत्युलक्षणो यः सागरतुल्यः; दुस्तरत्वात्। विदूनं विशेषेण दूनमुपतप्तं हृदं हृदयं यस्य, स विदूनहृदः (षष्ठी-बहुव्रीहिः)। एवंविधं ***मां*** तोटकाख्यं दासं ***भवसागरदुःखविदूनहृदं*** भवसागरस्य दुःखेन तापत्रयेन विदूनहृदं **पालय** रक्षतादित्यर्थः। कथम्? एतत्स्पष्टीक्रियते - *माम्* ***अखिलदर्शनतत्त्वविदम्*** अखिलानां समस्तानां दर्शनानां वेदान्तप्रतिपाद्यानां विषयाणां तत्त्वविदमात्मविषयकयथार्थज्ञानसम्पन्नम् (षष्ठी-तत्पुरुषः) ***रचय*** कुरु इत्यर्थः। हे शङ्कर! देशिक!! मे शरणं भवेति। इष्टानिष्टप्राप्तिपरिहारयोरलौकिक उपायभूते वेदे त्रीणि काण्डानि सन्ति कर्मोपासनाज्ञानसञ्ज्ञकानि। तेष्वशेषाणां दुःखानां नाशो ज्ञानात्-स्वस्वरूपज्ञानादेवेत्यत्र ध्वनितः। तत्र *'ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः'*[९] इति श्रुतिः प्रमाणम्। ननु कर्मोपासना निष्फल इति चेत्? न; परम्परया मोक्षसाधनत्वात्। निष्कामेण कर्मणा चित्तशुद्धिर्भवति, उपासनया तदैकाग्र्यञ्च। ताभ्यां विशुद्धे समाहिते च चेतसि स्वरूपज्ञानं समुदेति। तथैवाहुर्भगवत्पादाः *'अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणो धर्मो वर्णानाश्रमांश्चोद्दिश्य विहितः स देवादिस्थानप्राप्तिहेतुरपि सन् ईश्वरार्पणबुद्ध्यानुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसन्धिवर्जितः। शुद्धसत्त्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि प्रतिपद्यते'*[१०] इति।

मोक्षायापेक्षितस्य महावाक्यार्थस्योपदेशात् प्राङ् महावाक्यघटकपदानामर्थविज्ञानाय गुरुस्तदवतारप्रयोजनं विज्ञाप्य स्तूयते -

**भवता जनता सुहिता भविता निजबोधविचारण चारुमते।**
**कलयेश्वरजीवविवेकविदं भव शङ्कर देशिक मे शरणम्॥३॥**

हे निजबोधविचारण! हे चारुमते! भवता जनता सुहिता भविता, मामीश्वरजीवविवेकविदं कलय; हे शङ्कर! देशिक!! मे शरणं भवेति योजना। निजस्य स्वरूपभूतस्यात्मतत्त्वस्य बोधे ज्ञाने विचारणं

---

९. श्वेताश्वतरोपनिषदि १.११

१०. श्रीमद्भगवद्गीताशाङ्करभाष्योपोद्घाते

विचारो यस्य, स निजबोधविचारणः; तत्सम्बुद्धौ ***निजबोधविचारण*** (षष्ठी-बहुव्रीहिः)। चारुर्मनोज्ञा सुन्दरा मतिर्बुद्धिर्यस्य, स चारुमतिः; तत्सम्बुद्धौ ***चारुमते*** (षष्ठी-बहुव्रीहिः)। अथ वा; चारुः बृहस्पतिरिति कोशः[११]। चारुसञ्ज्ञबृहस्पतिसदृशी मतिर्बुद्धिः स्मृतिर्वा यस्य, स चारुसदृशमतिश्चारुमतिरित्येव; तत्सम्बुद्धौ ***चारुमते।*** अत्र मध्यमपदलोपी बहुव्रीहिः। अथ वा; निजबोधविचारणाच्चारुर्मतिर्यस्य, स निजबोधविचारणचारुमतिः; तत्सम्बुद्धौ ***निजबोधविचारणचारुमते*** (षष्ठी-बहुव्रीहिः)। ***भवता*** त्वया ***जनता*** जनसमूहो वेदप्रामाण्यवादी आस्तिक्यबुद्धिमान् ***सुहिता*** सुखी तृप्तश्च ***भविता*** भविष्यतीति श्रीशङ्कराचार्यस्य अवतारप्रयोजनमिङ्गितम्। पूर्वश्लोकगतं मामितिपदमनुवर्तनीयमत्र। मामीश्वरजीवविवेकविदं कलय। वस्तुतस्तु *'तत्त्वमसि'*[१२] इत्येकमुपदेशवाक्यमुपनिषत्प्रसिद्धं; यत्र *'तत्' 'त्वम्' 'असि'* इति त्रीणि पदानि विद्यन्ते। इमानि तु क्रमशः ईश्वरस्य जीवस्य तयोरैक्यस्य च वाचकानि। गुरूपदिष्टस्य महावाक्यार्थस्य मननमेव स्वरूपबोधकारणम्। परन्ततः प्राक् सर्वस्य महावाक्यतद्वर्तिपदानां चार्थविवरणमपेक्षते, यदत्र प्रार्थ्यते सादरं गुरुसेविना स्तोत्रा। हे गुरो! मां जीवेश्वरविवेकविदं ***कलय*** कुरु इत्यर्थः। ***जीवेश्वरविवेकविदम्*** इत्यत्र जीवस्य-त्वम्पदवाचकस्य ईश्वरस्य-तत्पदवाचकस्य च विवेको जीवेश्वरविवेकः, तस्य वित्-ज्ञाता इत्यर्थः (षष्ठी-तत्पुरुषः)।

अत्रतावदवतारप्रयोजनं कथितं किल। परं कस्यावतारभूतः श्रीशङ्कराचार्यो भगवत्पाद इति विवक्षायां 'कलौ रुद्रो महादेवो लोकानामीश्वरः परः। करिष्यत्यवतारं स्वं शङ्करो नीललोहितः॥ श्रौतस्मार्तप्रतिष्ठार्थं भक्तानां हितकाम्यया। उपदेक्ष्यति तज्ज्ञानं शिष्याणां ब्रह्मसञ्ज्ञितम्॥ सर्ववेदान्तसारं हि धर्मान् वेदनिदर्शितान्। सर्ववर्णान् समुद्दिश्य स्वधर्मा ये निदर्शिताः'[१३] इत्यादीनि पुराणवचनानि मनसि निधाय, कलौ वैदिकधर्मस्य पुनरुत्थापनाय स्वगुरुणा कृतान् प्रयत्नान्निरीक्ष्य च, तदीयं दिव्यतमं सामर्थ्यञ्चिन्तयन्नुद्घोषयति -

---

११. शब्दकल्पद्रुमे

१२. छान्दोग्योपनिषदि ६.८.७

१३. कूर्मपुराणे १.३०.३२-३५

**भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।**
**मम वारय मोहमहाजलधिं भव शङ्कर देशिक मे शरणम् ॥४॥**

***भवो*** नाम शिवः परमेश्वरः; *'व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः'*[१४] इत्यमरः। हे गुरो! भवान् भव **एव** असंशयम्। अहं विश्वसिमि यद्भवान् शिवावतार ***इति*** एवं ***मे*** मम ***चेतसि*** मनसि ***नितराम्*** अत्यन्तं कौतुकिता समजायत। यतो हि वर्णाश्रमलक्षणस्य वेदधर्मस्योत्थानाय धर्मब्रह्मनिरूपणपुरस्सरम् अद्वैतवेदान्तसिद्धान्तस्योपन्यासाय तत्रभवतः पराक्रमं प्राकृतं नास्ति। तस्मान्मन्मनसि ***कौतुकिता*** कुतुहलमपूर्ववस्तुदर्शनेच्छा ***समजायत*** प्रमाणनिरूपणपूर्वकमुदेति इत्यर्थः। किं तदपूर्ववस्तु यस्य दर्शनेच्छेति पृष्टे स्पष्टीक्रियते - यदि भवान् शिवस्तर्हि स तु विद्याप्रदाता गुरुर्देवता सर्वस्य लोकस्य; *'विद्याकामस्तु गिरिशम्'*[१५] इति पुराणप्रसिद्धम्। गुरुर्नाम अज्ञानान्धकारनिरोधको ज्ञानोपदेष्टा। अतो ***मम*** मदीयमपि ***मोहमहाजलधिं*** मोहमयं महाजलधिं (कर्मधारयः) ***वारय*** ज्ञानोपदेशद्वारा निवारयेत्यर्थः। अत्र मोहो नामाज्ञानं-मूलाज्ञानम्, तस्य जलधिना समुद्रेण साकं तुलना व्यापकत्वाद्दुस्तरत्वाच्च; तत्कार्याणाम् अविद्याकामकर्मलक्षणानां विस्तरेण तस्य महत्त्वं ज्ञेयम्।

अधुना स्वायोग्यतायां सत्यामपि कृपालुना स्वगुरुणा श्रीशङ्कराचार्येण परिपालनीयोऽहमिति धिया प्रार्थयति -

**सुकृतेऽधिकृते बहुधा भवतो भविता समदर्शनलालसता ।**
**अतिदीनमिमं परिपालय मां भव शङ्कर देशिक मे शरणम् ॥५॥**

बहुधा सुकृतेऽधिकृते भवतः समदर्शनलालसता भविता, अतिदीनमिमं मां परिपालय; हे शङ्कर! देशिक!! मे शरणं भवेति योजना। सुकृतं नाम पुण्यम्। अधिकृतं नाम शास्त्रोचितेन स्वाधिकारानुरोधेन कृतं सम्पादितं कर्म। ***भवतः*** अस्य शिष्यस्य तोटकसञ्ज्ञस्य ममेत्याशयः; ***बहुधा*** मुहुर्मुहुः ***सुकृते*** पुण्यकर्मणि ***अधिकृते*** यथायोग्येन सम्पादिते सति समदर्शनलालसता ***भविता*** भविष्यतीत्यर्थः; यतो हि पापसङ्गविवर्जिते पुण्यैश्च विशुद्धे चित्त एव ब्रह्मदर्शनयोग्यता सम्भवति। तथा हि श्रुतिरपि - *'नाविरतो*

---

[१४]. अमरकोशे १.१.३४

[१५]. श्रीमद्भागवतमहापुराणे २.३.७

*दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्'*[१६] इति। समं नाम ब्रह्म; *'पण्डिताः समदर्शिनः'*[१७], *'निर्दोषं हि समं ब्रह्म'*[१८] इत्यादिगीतोक्तिभ्याम्। अतः ***समदर्शनलालसता*** नाम समस्य ब्रह्मणो दर्शने लालसा इच्छा (सप्तमी-तत्पुरुषः)। हे गुरो! एवंविधा सा लालसता बहुधा सत्कर्मसु सत्सु भविष्यति। किन्तु मदीया तादृशी वृत्तिर्नास्ति; यतो हि ***अतिदीनो*** भीतः सर्वसाधनविवर्जितोऽस्म्यहमित्यर्थः। परं मदीय एको विशेषो विद्यते - अहं तव चरणाश्रितोऽस्मि इत्येव। गुरोर्लक्षणं भवद्भिरेव कथितं किल - *'अधिगततत्त्वः शिष्यहितायोद्यतः सततम्'*[१९] इति। अतस्तल्लक्षणं पुनरनुसन्धाय मनसि इमं ***माम्*** अतिदीनं ***परिपालय*** महावाक्योपदेशव्याजेन मम परिपालनमज्ञाननिरसनं कुरु इत्यर्थः।

अथ महात्मनां सुतपसामवतारप्रयोजनं परिशील्य तेषु महात्मसु विश्वदेशिकस्य श्रीशङ्करभगवत्पादस्य वैशिष्ट्यं प्रकटयति -

**जगतीमवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः ।**
**अहिमांशुरिवात्र विभासि गुरो भव शङ्कर देशिक मे शरणम् ॥६॥**

कलिताकृतयो महामहसो जगतीमवितुं छलतो विचरन्ति, हे गुरो! अत्र अहिमांशुरिव विभासि; हे शङ्कर! देशिक!! मे शरणं भवेति योजना। महस्तेजः। महद् महर्येषां, ते ***महामहसः*** (षष्ठी-बहुव्रीहिः) तेजस्विनो महात्मनो ब्रह्मसाक्षात्कारसम्पना इत्यर्थः। कलिता कृताऽऽकृतिः मनुष्यदेहलक्षणा यैस्ते ***कलिताकृतयः*** (तृतीया-बहुव्रीहिः)। ते किं कुर्वन्ति? ***छलतो*** लीलया ***विचरन्ति*** अटन्ति; *'मुक्ता अपि लीलया विग्रहं कृत्वा'* इतिश्रुतेः। किमर्थम्? जगतीं तद्वर्तिनं धर्मब्रह्मनिष्ठजनसमूहं यथायोग्याधिकारानुरोधेन तत्त्वोपदेशपूर्वकमवितुं रक्षितुमित्यर्थः; *'महद्विचलनं नृणां गृहिणां दीनचेतसां निःश्रेयसाय भगवन् कल्पते नान्यथा क्वचित्'*[२०] इतिपुराणोक्तेः। हे गुरो! ***अत्र*** अस्मिञ्जगतीतले तेषु सर्वेषु

---

[१६]. कठोपनिषदि १.२.२४

[१७]. श्रीमद्भगवद्गीतायाम् ५.१८

[१८]. तत्रैव ५.१९

[१९]. प्रश्नोत्तरमणिरत्नमालिकायाम् २

[२०]. श्रीमद्भागवतमहापुराणे १०.८.४

भवान्नहिमांशु इव विभासि मे प्रतीयत इत्यर्थः। हिमा शीतला अंशवो रश्मयो यस्य, स हिमांशुश्चन्द्रमा; न हिमा अंशवो यस्य, स ***अहिमांशुः*** - सूर्य इतितावत्। सर्वेषु तेजस्विमहात्मसु भवान् सूर्य इव ***विभासि*** प्रकाशसे। श्रीसुरेश्वराचार्यस्तु - *'आ शैलादुदयात्तथास्तगिरितो भास्वद्यशोरश्मिभिर्व्याप्तं विश्वमनन्धकारमभवद्यस्य स्म शिष्यैरिदम्। आराज्ज्ञानगभस्तिभिः प्रतिहतश्चन्द्रायते भास्करस्तस्मै शङ्करभानवे तनुमनोवाग्भिर्मनः स्यात्सदा'*[२१] इति।

पुनः श्रीशङ्कराचार्यस्य शिवावतारविषयत्वमभ्यस्य तदद्वितीयत्वं ज्ञापयति —

**गुरुपुङ्गव पुङ्गवकेतन ते समतामयतां न हि कोऽपि सुधीः ।**
**शरणागतवत्सल तत्त्वनिधे भव शङ्कर देशिक मे शरणम् ॥७॥**

हे गुरुपुङ्गव! हे पुङ्गवकेतन!! कोऽपि सुधीस्ते समतां न हि अयताम्; हे शरणागतवत्सल! हे तत्त्वनिधे! हे शङ्कर! देशिक!! मे शरणं भवेति योजना। *'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः'*[२२] इत्यमरोक्तेः गुरुपुङ्गवस्थपुङ्गवांशः श्रेष्ठत्वबोधकः। गुरूणां पुङ्गव इति गुरुपुङ्गवस्तत्सम्बुद्धौ ***गुरुपुङ्गव*** (षष्ठी-तत्पुरुषः); गुरुश्रेष्ठ इत्यर्थः। पुङ्गवो नाम वृषः, केतनं नाम ध्वजः। पुङ्गवकेतनो वृषध्वजः शिव एव; तत्सम्बुद्धौ ***पुङ्गवकेतन*** इति। हे गुरो! भवान् पुङ्गवकेतनः साक्षाच्छिव इत्यर्थः। ***ते*** तव ***समतां*** तुल्यतां ***कोऽपि*** कश्चिदपि ***सुधीः*** विपश्चित्तत्त्ववेत्ता ***न अयतां*** न भजत इत्याशयः। शरणे आ समन्ताद्गतः शरणागतः (सप्तमी-तत्पुरुषः), तस्मिन् वात्सल्यं दोषस्वीकारपूर्वकं स्नेहभावो यस्य, सः शरणागतवत्सलः (षष्ठी-बहुव्रीहिः); तत्सम्बुद्धौ ***शरणागतवत्सल।*** तत्त्वस्य उपनिषत्प्रतिपादितस्य आत्मतत्त्वस्य निधिः आधार इति तत्त्वनिधिः (षष्ठी-तत्पुरुषः), तत्त्वम्-आत्मा निधिर्यस्य, स तत्त्वनिधिः (षष्ठी-बहुव्रीहिः); तत्सम्बुद्धौ ***तत्त्वनिधे।*** हे एवंविध शङ्कर! देशिक!! मे शरणं भवेति।

गुरोः सकाशाद्विद्योपलब्धयेऽयं नियमः - *'गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा। अथवा विद्यया विद्या चतुर्थो नोपलभ्यते'* इति नीतिं मनसि निधायाधुना स्तवमुपसंहरति गुरूपासकस्तोटकयतिः -

---

२१. बृहदारण्यकभाष्यवार्त्तिके ६.५.२५

२२. अमरकोशे ३.१.१२०

**विदिता न मया विशदैककला न च किञ्चन काञ्चनमस्ति गुरो ।**
**द्रुतमेव विधेहि कृपां सहजां भव शङ्कर देशिक मे शरणम् ॥८॥**

विशदा एका कला इति ***विशदैककला*** (कर्मधारयः)। पूर्वोक्ते न्याये एकां विद्यां गुरवे निवेद्य तेनैका विद्या लभ्येति *'विद्यया विद्या'* इत्यंशस्याशयः। किन्तु मया गिरिणा न एकाऽपि कला विशदा विस्तरशो ***विदिता*** अवगता, अतो *'विद्यया विद्या'* इत्यंशोऽसम्भवः। अथो सर्वासां विद्यानामाश्रयो भवान्नित्यतोऽपि। एवञ्च हे गुरो! मद्धस्ते ***किञ्चन*** यत्किमपि ***काञ्चनं*** धनद्रव्यादिकं नैवेद्यमपि नास्ति। अतः पूर्वोक्तस्य न्यायस्य *'पुष्कलेन धनेन वा'* इत्यंशोऽप्यसम्भवः। परं *'गुरुशुश्रूषया विद्या'* इत्यंशो मया भक्त्या चरितार्थः। एतस्माद् ***द्रुतमेव*** यथाशीघ्रं मयि ***सहजां*** भवत्कृपालुस्वभावसिद्धां ***कृपां*** मोहाज्ञाननिवारिणीम् अनुग्रहलक्षणां ***विधेहि*** कुरु इत्यर्थः।

अत्र जगद्गुरोर्भगवतः श्रीशङ्कराचार्यस्य मनःसङ्कल्पेनाद्वैतज्ञानसिद्धः श्रीतोटकवर्यः सर्वत्राद्वयात्मतत्त्वं पश्यन् किमर्थं स्वगुरुणा सह स्तोत्रादिरूपं द्वैतं स्वीकृतवान्? इति शङ्क्यते चेदयुक्तमेतत्; सिद्धेऽप्यद्वैतज्ञाने गुरुणा सहाद्वैतं न भावनीयमिति सम्प्रदायात्। तथैव शिक्षयति स्वयं भगवान् भाष्यकारः - *'अद्वैतं त्रिषु लोकेषु नाद्वैतं गुरुणा सह'*[२३] इति, *'यावदायुस्त्रयो वन्द्या वेदान्तो गुरुरीश्वरः'*[२४] इति च। अतोऽद्वैतनिष्ठैस्तत्त्वज्ञैः पूर्वाचार्यैः स्वगुरुवन्दनादिकमनवद्यमिति शिवम्॥

*॥ इति केनचिच्छङ्करकिङ्करेण नागपालाङ्कुरेण कृतया रमावृत्त्या वलितं*
*श्रीतोटकाचार्यकृतशङ्करदेशिकाष्टकं सम्पूर्णम् ॥*

## सन्दर्भग्रन्थाः


1. उप्रैती थानेशचन्द्र (२००६), स्तुतिकदम्ब, श्रीदक्षिणामूर्तिमठप्रकाशन (वाराणसी)
2. गिरि महेशानन्द (१९९०), बृहदारण्यकभाष्यवार्त्तिकम् (खण्डः-२), महेश अनुसन्धान केन्द्र (वाराणसी)
3. गिरि विद्यानन्द (२००१), नित्यानुष्ठानविधिः एवं शाङ्करभाष्ययुतं श्रीविष्णुसहस्रनामस्तोत्रम्, कैलासविद्याप्रकाशन (ऋषीकेश)
4. पणशीकर वासुदेव लक्ष्मण (२०१०), ईशाद्यष्टोत्तरशतोपनिषदः, चौखम्बा विद्याभवन (वाराणसी)


[२३]. तत्त्वोपदेशे ८७

[२४]. तत्रैव ८६

5. बहादुर राधाकान्तदेव (?), शब्दकल्पद्रुमः, चौखम्बा संस्कृत सीरिज़ आफ़िस (वाराणसी)
6. मुखोपाध्याय नीलमणि (१८९०), कूर्मपुराणम्, गिरीशविद्यारत्न यन्त्रालय (कलिकाता)
7. शास्त्री रामतेज (१९९३), श्रीमद्भागवतम्, चौखम्बा संस्कृत प्रतिष्ठान (दिल्ली)
8. शास्त्री हरगोविन्द (१९६८), अमरकोशः (मणिप्रभा-हिन्दीटीकोपेतः), चौखम्बा संस्कृत सीरिज़ (वाराणसी)
9. सरस्वती सच्चिदानन्देन्द्र (२०१५), श्रीमद्भगवद्गीता (श्रीशाङ्करभाष्यसमेता), अध्यात्म प्रकाश कार्यालय (होळेनरसिंहपुर)